# ॥ श्री प्रज्ञाविवर्धन स्तोत्र ॥

अस्य श्रीप्रज्ञाविवर्धनस्तोत्रमंत्रस्य सनत् कुमार ऋषीः।
स्वामी कार्तिकेयो देवता । अनुष्टुप छंदः ।
मम सकलविद्या सिद्धर्थं जपे विनियोगः।

**श्रीस्कंद उवाच**

योगीश्वरो महासेनः । कार्तिकेयो अग्निनंदनः ॥
स्कंदः कुमारः सेनानीः । स्वामी शंकरसंभवः ॥१॥
गांगेय स्ताम्रचूडश्च । ब्रह्मचारी शिखिध्वजः ॥
तारकारी उमापुत्रः । क्रौंचारिश्च षडाननः ॥२॥
शब्द ब्रह्म समुद्रश्च । सिद्धःसारस्वतो गुहः ॥
सनत् कुमारो भगवान् । भोग मोक्ष फलप्रदः ॥३॥
शरजन्मा गणाधीश । पूर्वजो मुक्ति मार्गकृत् ॥
सर्व आगम प्रणेता च । वांछितार्थ प्रदर्शनः ॥४॥
अष्टाविंशतिनामानि । मदीयानीति यः पठेत् ॥
प्रत्यूषे श्रद्धया युक्तो । मूको वाचस्पतिर् भवेत् ॥५॥
महामंत्र मयानीति । मम नामानुकीर्तनम् ॥
महाप्रज्ञा मवाप्नोति । नात्र कार्या विचारणा ॥६॥

**॥ श्रीकार्तिकेयार्पणमस्तु ॥**